## आदौ-मुख्यवार्ता:

- **प्रधानमन्त्री प्रावोचत् यत् क्वाड-समूह: हिन्द-प्रशान्त-क्षेत्रे शान्त्यै, प्रगत्यै समृद्धयै च कार्यं कर्तुं समान-वैचारिक-दृष्टियुतानां देशानां प्रमुख-समूहत्वेन समक्षम् आगतोऽस्ति। प्रधानमन्त्री 'क्वाड'-नेतृणां षष्ठे वार्षिक-शिखर-सम्मेलने सहभागं कर्तुं तत्र अद्य अर्धरात्रे: अनन्तरं प्रारप्स्यते।**
- **आम-आदमी-पार्टिति-दलस्य वरिष्ठनेत्री आतिशी अद्य दिल्ल्या: मुख्यमन्त्रित्वेन शपथम् अग्रहीत्।**
- **जम्मू-कश्मीरे विधानसभा निर्वाचनानां प्रचाराभियानं चरमं स्पृशते।**
- **श्रीलङ्कायाम् आर्थिक-मन्दताया: अनन्तरं प्रथमतया राष्ट्रपति-निर्वाचनं सष्ठुतया भवति।**
- **भारतस्य ऋतुविभागेन, आईएमडी इत्यनेन आगामिदिनेषु देशस्य अनेकेषु भागेषु प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं कृतम् अस्ति।**
- **चेन्नई-नगरे एम्.ए. चिदम्बरम्-क्रीडाङ्गणे भारत-बांग्लादेशयो: मध्ये अनुवर्तमानाया: प्रथम-क्रिकेट्-निकष-स्पर्धाया: तृतीये दिने अतिथिदलेन चतुर्णां क्रीडकाणां हानिपूर्वकम् अष्ट-पञ्चाशदधिक-शतं धावनाङ्का: अर्जिता।**

## अथ वार्ताः विस्तरेण

## प्रधानमन्त्री-अमेरिका यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अमेरिकाया: डेलावेयरे विलमिंगटन-नगरे 'क्वाड'-नेतृणां षष्ठे वार्षिक-शिखर-सम्मेलने सहभागं कर्तुं तत्र अद्य सम्प्राप्नोति। भारतीय-समयानुसारि एतत् सम्मेलनं अर्धरात्रे: अनन्तरं प्रारप्स्यते। आशा अस्ति देशचतुष्टयस्य सदस्या: ऋतुदशा-परिवर्तनं, महत्वपूर्णा: अभिनवा: प्राविधिक्य: इत्यादीन् विषयान् अभिलक्ष्य विचारणां करिष्यन्ति। शिखर-सम्मेलनात् प्राक् प्रधानमन्त्री अमेरिका-राष्ट्रपतिं जो-बाइडेनं मेलिष्यति।

श्रीमोदी ऑस्ट्रेलिया-देशस्य प्रधानमन्त्रिणा एन्थनी-अलबेनिजेन जापान-प्रधानमन्त्रिणा फुमियो-किशिदा-इत्यनेन च सह उभय-पाक्षिकोपवेशनम् आकारयिष्यति।

अद्य प्रातः अमेरिकायै प्रस्थानात् प्राक् प्रधानमन्त्री प्रावोचत् यत् क्वाड-समूहः हिन्द-प्रशान्त-क्षेत्रे शान्त्यै, प्रगत्यै समृद्धयै च कार्यं कर्तुं समान-वैचारिक-दृष्टियुतानां देशानां प्रमुख-समूहत्वेन समक्षम् आगतोऽस्ति। अपि च, असौ सम्मेलने स्व-सहयोगिभिः सह सहभागं कर्तुं समुत्सुकोऽस्ति। सः विश्वास प्राकटयत् यत् राष्ट्रपतिना बाइडनेन सह उपवेशनान्तरं भारतामेरिका-देशाभ्यां व्यापक-वैश्विक-रणनैतिक-सहभागितां भूयोऽपि दृढयितुम् अवसरः प्राप्स्यते।

श्रीमोदी अमेरिकास्थानां प्रमुख-समवायानां शीर्षाधिकारिभिः सह अपि परिचर्चां करिष्यिति। यात्रायाः अन्तिमे दिवसे प्रधानमन्त्री संयुक्त-राष्ट्र-महासभायां 'भविष्यते शिखर-सम्मेलनम्' इत्यभिधानकम् उपवेशनं सम्बोधयिष्यति। अस्य विशिष्ट-शिखर-सम्मेलनस्य विषयः अस्ति-'भद्रतर-भविष्यते बहुपाक्षिकं समाधानम्' इति।

शिखर-सम्मेलनात् पूर्वं प्रधानमन्त्री भारतीय-समुदायं संबोधयिष्यति। विशिष्य छात्रेषु तस्य भाषणम् अभिलक्ष्य सुमहान् उत्साहः वर्तते।

## **आतिशी-शपथग्रहणम्**

आम-आदमी-पार्टिति-दलस्य वरिष्ठनेत्री आतिशी अद्य दिल्ल्याः मुख्यमन्त्रित्वेन शपथम् अग्रहीत्। राजनिवासे आयोजिते शपथग्रहरण-समारोहे उपराज्यपालेन विनय कुमार-सक्सेना-इत्यनेन आतिशी तस्याः मन्त्रिपरिषदः सदस्याः च पदगोपनीयतायै प्रतिज्ञापिताः। राष्ट्रपतिना द्रौपदी-मुर्मु-इत्यनाया शपथ-ग्रहण-दिवसात् आतिशी दिल्ल्याः मुख्यमन्त्रि-रूपेण नियोजिता।

## **राष्ट्रपति-माओवादी**

राष्ट्रपति पदासीना द्रौपदीमुर्मु: अद्य नवदिल्ल्यां राष्ट्रपति भवने छत्तीसगढस्य बस्तर सम्भागस्य माओवादी हिंसाया: पीड़ितै: सह मेलनं कृतवती। एकस्मिन् सामाजिक संजालीय-सन्देशे राष्ट्रपति: प्रोक्तवती यत् स्वीय-उद्देश्यानांम पूर्तयेहिंसाया: मार्गे न गन्तव्यं, योहि समाजस्य कृते हानिप्रद: एव। राष्ट्रपति मुर्मु वामदलीयानां अतिवादिनम् आग्रहं कृतवती यत् हिंसाया: निराकरणं कुर्वन्तु, तेषां समास्यानां समाधानाय सर्वकार: सर्वविध प्रयासा: करिष्यति इति।

**<u>शाह-पूंछ जनसभा</u>**

भाजपेति दलस्य वरिष्ठ: नेता तथा केन्द्रीयगृहमन्त्री अमितशाह: अद्य उक्तवान् यत् जम्मू-कश्मीरे प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे आतङ्कवादात् मुक्तिं प्रति अभूतपूर्व परिवर्तनम् अभवत्। पूंछ मण्डलस्य मेढरे एकां जनसभां सम्बोधयन् श्रीशाह: उक्तवान् यत् जम्मू-कश्मीरस्य यूनां हस्तेषु सम्प्रति पाषाणखण्डस्य स्थाने लैपटॉप इति संगणक यन्त्राणि सन्ति।

**बाइट-अमित शाह लैपटॉप 21 से. (हिन्दी)**

श्रीशाह: आरोपितवान् यत् जम्मू-कश्मीरस्य लोकतन्त्रं त्रिभि: प्रभावशलिन: परिवारै: गृहितम् आसीत्। चतुर्दशोत्तर द्विसहस्र-तमे वर्षे श्रीमोदिन: सर्वकारस्य सत्ताप्राप्ते: अनन्तरमेव भूम्यस्तरे मार्गप्रशस्तमभवत् , येन पञ्चायते, सम्भागे, मण्डलस्तरेषु च निर्वाचनानि सुनिश्चितानि। श्रीशाह: प्रतिपादितवान् यत् राष्ट्रिय-जनतान्त्रिक-गठबन्धनस्य अथक प्रयासै: अद्य सहस्रश: कश्मीरी यूवान: स्वीय लोकतान्त्रिकाधिकाराणां प्रयोगं कुर्वन्त: विभिन्नस्तरीये निर्वाचने भागं भजन्ति।

-

**<u>निर्वाचनायोग:-जम्मू-कश्मीर-निर्वाचनम्</u>**

भारतस्य निर्वाचनायोगेन उक्तं यत् जम्मू-कश्मीरे बुधवासरे आयोजिते प्रथमचरणस्य विधानसभानिर्वाचने एकषष्ठिः दशमलव अष्टत्रिंशत् प्रतिशतं मतदानं जातम्। आयोगेन उक्तं यत्, जम्मू-कश्मीरे विगतेषु पञ्चत्रिंशत् वर्षेषु एतत् सर्वाधिकं मतदान-प्रतिशतम् अस्ति।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**भारत-ब्राजीलौ**

भारत-ब्राजीलाभ्याम् ऊर्जा-क्षेत्रे अनुवर्तमान-सहयोगस्य, द्विपक्षीये व्यापारे पारस्परिक-रूपेण लाभाकारि-संबन्धनां, सुस्थिरेषु ईन्धनेषु विशिष्य जैवेन्धने सहभागितायाः च समीक्षा कृता। शिलातैल-प्राकृतिक-वातिमन्त्रिण: हरदीप-सिंह-पुरिण: ब्राजीलस्य खन्यूर्जा-मन्त्रिण: एलेक्जेंडर-सिलविएरा-इत्यस्य च उपवेशनानन्तरं प्रसारिते संयुक्त-वक्तव्ये एवम् उदीरितम्।

-

**श्रीलंका**

श्रीलङ्कायाम् आर्थिक-मन्दतायाः अनन्तरं प्रथमतया राष्ट्रपति-निर्वाचनं सष्ठुतया भवति। सप्तति-लक्षाधिकैक-कोटि-संख्याकानां मतदातृणां, द्वीपे अधुनावधि मतदानानि शान्तिपूर्णरीत्या जातानि। अस्माकं वार्ताहर: असूचयत् यत् द्वाविंशतिषु नैर्वाचनिकेषु जनपदेषु चतुश्शतोत्तर त्रयोदश-सहस्राधिकेषु मतदान-केन्द्रेषु मतदानं प्रात: सप्तनादने आरब्धम्।

**ऋतु-विभाग**

भारतस्य ऋतुविभागेन, आईएमडी इत्यनेन आगामिदिनेषु देशस्य अनेकेषु भागेषु प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं कृतम् अस्ति। श्वः आरभ्य मंगलवासरपर्यन्तं ओडिशायां, गुरुवासरपर्यन्तं नागालैण्डे, मणिपुरे, मिजोरमे, त्रिपुरायां च अतिवृष्टिः भविष्यति। अरुणाचलप्रदेशे, असमे, मेघालये च सोमवासरात् गुरुवासरपर्यन्तं प्रचण्डवृष्टिः भवितुं शक्नोति। अस्मिन्नेव समये छत्तीसगढे अपि प्रचण्डवृष्टेः सम्भावना विद्यते, विदर्भ-पूर्वमध्यप्रदेशयोः च मंगलवासरात् गुरुवासरपर्यन्तं प्रचण्डवृष्टिः भवितुं शक्नोति।

## संस्कृत-साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतःभविष्यति। कृपया श्रृण्वन्तु।

## जापान-अतिवृष्टि

जापाने प्रायः त्रिंशत् सहस्रं जनाः देशस्य मध्यभागस्थं नगरद्वयं परित्यज्य सुरक्षित-स्थानानि गन्तुं समादिष्टाः। ऋतुविभागेन अतिवृष्ट्या जलाप्लाव-स्थिते पूर्वानुमान-पुरस्सरम् एवम् आदिष्टम्।

## क्रिकेट-

चेन्नई-नगरे एम्.ए. चिदम्बरम्-क्रीडाङ्गणे भारत-बांग्लादेशयोः मध्ये अनुवर्तमानायाः प्रथम-क्रिकेट्-निकष-स्पर्धायाः तृतीये दिने अतिथिदलेन चतुर्णां क्रीडकाणां हानिपूर्वकम् अष्ट-पञ्चाशदधिक-शतं धावनाङ्काः अर्जिताः। इतः पूर्वं भारतं चतुर्णां क्रीडकाणां हानिपूर्वकं सप्ताशीत्यधिक-द्विशत-धावनांकान् अर्जित्वा द्वितीयपाल्यै घोषणाम् अकरोत् ।

**।। इति वार्ताः।।**